PAGE NO.:

कक्षा - सप्तमी विषय - संस्कृतम्

पठितावबोधनम्

(गद्यांशः) —

1. एकः चित्रकारः आसीत् । चित्रनिर्माणे तस्य अतीव रुचिः आसीत् । यत्र-यत्र सः शोभनानि दृश्यानि पश्यति स्म तत्र-तत्र सः चित्रनिर्माणं करोति स्म । एकदा सः नगराद् बहिः अगच्छत् । तत्र पर्वतानाम् पृष्ठात् सूर्यस्य स्वर्ण-रश्मयः वातावरणं स्वर्णमयं कुर्वन्ति स्म ।

एतत् शोभनं दृश्यं दृष्ट्वा सः पर्वतप्रदेशम् आरुह्य चित्रनिर्माणं प्रारभत ।

क). एकपदेन उत्तरत —

(i) चित्रकारः किं करोति स्म ?

(ii) चित्रकारः कुत्र आरुह्य चित्रनिर्माणं प्रारभत ?

(iii) सूर्यस्य स्वर्ण-रश्मयः वातावरणं किं कुर्वन्ति स्म ?

ख). पूर्णवाक्येन उत्तरं लिखत —

(i) चित्रकारः कीदृशं चित्रनिर्माणं प्रारभत् ?

(ii) चित्रकारः एकदा कुत्र अगच्छत् ?

ग) निर्देशानुसारम् उत्तरं लिखत —

(i) "चित्रनिर्माणे तस्य अतीव रुचिः आसीत् ।" अत्र अव्ययपदं किम् ?

(ii) 'शोभनं दृश्यं' अत्र विशेषणपदं किम् ?

(iii) 'एकः चित्रकारः आसीत्' अत्र कर्तापदं किम् ?

रेखांकितपदानि आधृत्य प्रश्न-निर्माणं कुर्वन्तु —

(i) <u>कच्छपः</u> वक्तुम् उद्यतः अभवत् ।

(ii) छात्रः <u>मातरम्</u> अपृच्छत् ।

(iii) <u>साध्वोः</u> विद्या ज्ञानाय भवति ।

(iv) <u>काकी</u> हारम् आनयत् ।

(v) <u>धनेन</u> धर्मस्य कार्याणि भवन्ति ।

(vi) रूपस्य आभूषणं <u>गुणः</u> भवति ।

PAGE NO.:

3. 'आम्' अथवा 'न' लिखन्तु —
(i) किम् अभ्यासः परमो गुरुः ?
(ii) खलस्य विद्या ज्ञानाय भवति।
(iii) सज्जनाः धनं प्राप्य दानम् अपि कुर्वन्ति।
(iv) किं सर्पः कुटीरे वसति स्म।
(v) किं बुद्धिमान् एव शास्त्रस्य लाभं प्राप्नोति ?
(vi) किं स्वर्णस्य आभूषणं श्रेष्ठं भवति?
(vii) किं एकेन हस्तेन तालिकावादनं भवति ?

4. अनुच्छेदं लिखन्तु :—
स्वामी दयानन्दः अथवा मम मित्रम्

5. मञ्जूषायाः उचितं विपरीतार्थकपदं चित्वा लिखन्तु —
(i) आरुह्य
(ii) पूर्णम्
(iii) दत्वा
(iv) नवीनाम्
(v) चतुरः

मञ्जूषा —

गृहीत्वा, मूर्खः, अवतीर्य, अपूर्णम्, प्राचीनाम्

6. मञ्जूषायाः उचितं पर्यायपदं चित्वा लिखन्तु —
(i) दृष्ट्वा
(ii) सर्पः
(iii) वारि
(iv) आभरणम्
(v) प्रज्ञा

मञ्जूषा —

आभूषणम्, भुजङ्गः, अवलोक्य, बुद्धिः, जलम्

7. संस्कृते अङ्कान् लिखन्तु :—
3, 7, 10, 20, 30, 60, 40, 16, 50.

8. ~~मञ्जूषायाः रिक्तस्थानानि पू~~

PAGE NO.:

8. श्लोकं पठित्वा मञ्जूषायाः रिक्त स्थानानि पूरयन्तु —

यथा —

हस्तस्यभूषणं दानं भवति।

(i) विद्यां प्राप्य मनुष्यः ... भवति।
(ii) - - मानवः फलं न प्राप्नोति।
(iii) ज्ञानवान् जनः यदि - - - -

भवति, तर्हि सः सम्मानं प्राप्नोति
(iv) बुद्धिमान जनः एव - - - -
ज्ञानं प्राप्तुं शक्नोति।

मञ्जूषा — क्षमाशीलः, दानं, शास्त्राणां, विनम्रः, परिश्रमं

9. कोष्ठकात् उचितविशेषणपदम् अथवा विशेष्यपदं चित्वा वाक्यानि पूरयन्तु —

(i) अत्र एकः ...... मार्जारः अस्ति। (सुन्दरः, सुन्दरम्)
(ii) बुद्धिमान् ...... गायति। (बालिका, बालकः)
(iii) ...... मयूरः हसति। (नीलः, नीलम्)
(iv) बालाः ...... फलानि खादन्ति। (मधुरं, मधुराणि)

(v) सः ...... कलमेन लिखति। (हरितेन, हरितं)

10. संधि व संधि विच्छेदं कुरुत —
तथा + एव, इति + आदिः, स + एव, सदा + एव
यद्यपि, चैव, वनौषधिः, अनु + अयः
स्वागतम्।

PAGE NO.:

11. मञ्जूषातः उचित अव्ययपदानि चित्वा रिक्त-स्थानानि पूरयन्तु —
(i) ..... मम परीक्षा भविष्यति।
(ii) कच्छपः ....... चलति।
(iii) बालः ....... पाठस्य अभ्यासम् अकरोत्।
(iv) लोके सत्यम् .... जयते।
(v) त्वं ...... पठसि ?

मञ्जूषा —

| |
|---|
| पुनः पुनः, एव, शनैः शनैः, कदा, श्वः |

12. उचित शब्दरूपैः रिक्त स्थानानि पूरयन्तु —
(i) ..... मती मतयः।
(ii) .... पितरौ पितरः।
(iii) .... कवी कवयः।
(iv) ..... आवाम् वयम्।
(v) .... युवाभ्याम् युष्मभ्यम्।
(vi) ..... आवयोः अस्माकम्।

13. उचित-धातुरूपैः रिक्त-स्थानानि पूरयन्तु :—
(i) ..... पठावः पठामः।
(ii) .... अखादताम् अखादन्।
(iii) ..... नमावः नमामः।
(iv) ..... सेवेते सेवन्ते।
(v) ..... सेवावहे सेवामहे।

14. उपसर्गान् पृथक् कृत्वा वा योजयित्वा लिखत —
प्र+सीदति, ~~अ~~ उत् + पतन्ति, अव + गच्छति,
वि + स्मरति, अनुभवति, उपदिशति, निर्दिशति।

15. धातु-प्रत्ययं ~~किम पृक~~ पृथक् कृत्वा वा ~~योजयित्वा~~ संयोज्य लिखत —
पठ् + तुमुन्, दृश् + क्त्वा, खेल् + क्त्वा
चलितुम्, ~~भ्रमितुम~~ भ्रमितुम्, धाव् + तुमुन्,

PAGE NO.:

पठ् + तव्यत्, खादितव्यः, गम् + तव्यत्,
दृश् + तव्यत् ।

16. मित्रं प्रति वर्धापनं पत्रं लिखन्तु ।

17. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु -

(i) -------- पुरतः मन्दिरम् अस्ति । (गृहे / गृहस्य)
(ii) -------- परितः भक्ताः सन्ति । (मन्दिरस्य / मन्दिरं)
(iii) -------- बहिः उद्यानम् अस्ति । (ग्रामाय / ग्रामात्)
(iv) अलं ------ । (कोलाहलं / कोलाहलेन)
(v) पिता -------- फलं यच्छति । (पुत्राय / पुत्रं)